ओ३म्

गुरुकुल-पत्रिका

[गुरुकुलकांगड़ीविश्वविद्यालयस्य मासिक पत्रिका]

आषाढ : २०३१, जौलाई १९७४, वर्षम्-२६, अङ्कः ११, पूर्णाङ्कः ३०७

श्रुति सुधा

ओ३म् सुप्रैतुः सूयवसो न पन्था दुर्नियन्तुः परिप्रीतो न मित्रः ।
अनर्वाणो अभि ये चक्षते नोऽपीवृता अपोर्णुवन्तो अस्थुः ॥६॥

हे बृहस्पति ! तुम शिष्य के लिये (सुप्रैतुः) शोभन तथा प्रकृष्ट गति तथा (सूयवसः) श्रेष्ठ अन्नवाले पथिक के (पन्था न) मार्ग के तुल्य हो । (दुर्नियन्तुः) अपनी इन्द्रिय आदियों को नियन्त्रित कर सकने में असमर्थ शिष्य के लिये (परिप्रीतः) प्रीतिपूर्वक व्यवहार करने वाले (मित्रः न) मित्र के सदृश हो । (अनर्वाणः) अहिंसनीय पापरहित स्वाश्रयी (ये) जो गुरुजन (नः अभि-चक्षते) हमारी देख रेख करते हैं वे (अपीवृताः) गुह्य हृदयप्रदेश में रहने के कारण प्रच्छन्न होते हुए भी (अपोर्णुवन्तः अस्थुः) हम शिष्यों के प्रति खुले हुए हैं ।

सुप्रैतुः=सु+प्र+इण् गतौ–सुष्ठु विद्योपेतस्य,—स्वामी दयानन्द
सुष्ठु गन्तुः,–सायणाचार्य

दुर्नियन्तुः–दुःखेन नियमितुः

अपीवृताः–आच्छादिताः, गुह्यहृदयप्रदेशे प्रच्छन्नाः ।

जिसप्रकार खूब चलने वाला पथिक मार्ग में बुभुक्षा के शमन के लिये कुछ अन्न साथ में रख लेता है और आसानी से अपना मार्ग तै कर लेता है, उसी भांति ज्ञानमार्ग पर चलने वाले शिष्य के लिये बृहस्पति आचार्य एक पन्था के समान हैं अर्थात् शिष्य, बृहस्पति आचार्य को देखता है और यह निश्चय करता है कि बृहस्पतित्व तक पहुंचना है । बृहस्पति के उपदेश उसके पाथेय हैं । वह उसका पन्था होता हुआ भी शोभनमार्गद्रष्टा भी है । अन्य गुरुजन भी अपने हृदय–गुहा में सततरूप में विद्यमान रहते हुए भी सुशिष्य के प्रति सदा खुले रहते हैं । इस मन्त्र से यह ध्वनित होता है कि गुरुजनों को योगाभ्यास भी करते रहना चाहिये ।

अग्निमन्त्रमाला

(श्री अरविन्दप्रणीत 'Hymns to the Mystic Fire' ग्रन्थस्य धारावाहिकोऽनुवादः, अनुवादकोपज्ञेन भावार्थेन तदुपज्ञनानाविधटिप्पणीभिश्च संवलितः)

अनुवादकः श्री जगन्नाथो वेदालंकारः

अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे ।
असि होता न ईड्यः ।।३।।

१ अग्ने । २ देवान् । ३ इह । ४ आ । ५ वह । ६ जज्ञानः । ७ वृक्त-बर्हिषे । ८ असि । ९ होता । १० नः । ११ ईड्यः ।।

1 O fire. 6 thou being born. 3 hither. 4,5 bear. 2 the Gods. 7 for the sacrificer who spreads the holy seat. 8 thou art. 10 our. 11 desirable. 9 summoning priest.

१ हे अग्निदेव ! ७ आस्तीर्णपवित्रासनाय यजमानाय । ६ जातः, प्रादुर्भूतः सन् । त्वम् ३ अत्र यज्ञवेदौ । २ अन्यान् इन्द्रादीन् देवान् । ४,५ आनय । त्वं हि । १०अस्माकम् । ११अध्येषणीयत्वेन (काम्यत्वेन) स्तुत्यः । ९ आह्वानकरः पुरोहितः । (भवसि) ।

भावार्थः

हे अग्ने ! प्रादुर्भव । येन यजमानेन तव अन्येषां च देवानामागमनार्थं पवित्रासनं, पूतहृदयासनमास्तीर्णं तस्मै त्वम् तस्यान्तर्वेदौ देवान् आवह। त्वमस्माकमध्येषणीयः, अभीप्स्यः, देवानाम् आह्वाता पुरोहितोऽसि ।

व्याकरणम्

६ जज्ञानः । 'जनी' प्रादुर्भावे इत्यतः लिटः कानच् ।

७ वृक्त-बर्हिषे । वृक्तमास्तीर्णं बर्हिः पवित्रासनं, हृदयासनं येन तस्मै ।

११ ईड्यः । द्र. १.१.२[4] । अत्र ईडिरध्येषणाकर्माऽपि द्रष्टव्यः ।

ताँ उशतो वि बोधय यदग्ने यासि दूत्यम् ।
देवैरा सत्सि बर्हिषि ।।४।।

१ तान् । २ उशतः । ३ वि । ४ बोधय । ५ यत् । ६ अग्ने । ७ यासि । ८ दूत्यम् । ९ देवैः । १० आ । ११ सत्सि । १२ बर्हिषि ।

6 O fire. 5 when. 7 thou goest. 8 as our envoy. 4 awaken. 1 them. 3 up. 2 who desire. our offerings. 11 take thy seat. 9 with the Gods. 10,12 on the holy grass.

६ हे अग्निदेव ! ५ यदा । त्वम् अस्माकं ८ दूतत्वं ७ प्राप्नोषि, अस्माकं दूतः सन् देवान् प्रति गच्छसि । तदा त्वम् २ अस्मदाहुतिकामिनः। १तान् देवान् । ३,४ जागरय, प्रबुद्धान् कुरु । १०,१२ पवित्रकुशासने, पवित्रितहृदासने । त्वं ९ देवताभिः सह । ११ आसीद, विराजेत्यर्थः ।

भावार्थः

हे अग्ने ! यदा त्वं देवान् प्रति अस्माकं दूतो भूत्वा गच्छसि दूतकर्मनिर्वाहार्थं, तैः सहास्माकं सम्पर्कस्थापनार्थं, तदा त्वमस्मद्हव्याभिलाषिणः अस्मत्सत्तासमर्पणकामिनस्तान् प्रबोधय, प्रबोध्य च तैः सहैव त्वमस्माकं परिपूतहृदयासने आसीनो भव ।

व्याकरणम्

२ उशतः । वश कान्तौ (कान्तिरिच्छा) इत्यस्माल्लटः शतरि द्वितीयाबहुवचनम् ।

१० आ । आङिति निपातत्वादव्ययम् । अत्रैष निपातो 'बर्हिषि' इति सप्तम्यन्तपदेन युक्तस्तदर्थोपबृंहणः कर्मप्रवचनीयः ।

११ सत्सि । षद्लृधातो र्लोडर्थे लट् । शब्लुगादि छान्दसम् ।

**घृताहवन दीदिवः प्रति ष्म रिषतो दह ।
अग्ने त्वं रक्षस्विनः ॥५॥**

१ घृत-आहवन । २ दीदि-वः । ३ प्रति । ४ स्म । ५ रिषतः । ६ दह । ७ अग्ने । ८ त्वम् । ९ रक्षस्विनः ।

7 O Fire. 8 thou. 1 who art called by the offerings of clarity. 2 thou shining one. 3 do thou oppose. and 6 burn down. 5 the haters. 9 that confine. (4 expletive)

१ घृतेन घृताहुतिभिरर्थाद् दीप्तधियो हव्यैराहूयमान । २ देदीप्यमान । ७ अग्निदेव ! ८ त्वम् । ९ रक्षोयुक्तान्, मार्गावरोध-परिसीमनादिराक्षसभावयुक्तान् । ५ द्वेषद्रोहपरान् शत्रून् । ३ प्रतिकुरुष्व । ६ भस्मसाच्च कुरु ।

(४ 'स्म' इति पादपूरकः)

भावार्थः

हे अग्ने ! त्वं दीप्तधियैव, प्रकाशितमनसैव आह्वातुं पार्यसेऽन्तर्याजकैः, त्वाम् आह्वातुं मानसज्योतिषो हव्यानि त्वयि हूयन्ते तैः । ईदृशहव्यार्पणेनाहूतस्त्वमस्मासु प्रज्वलितो जायसेऽतितराम् । प्रज्वलितश्च त्वं राक्षसभावयुक्तान् प्रगतिपथप्रतिरोधकान्, सीमाबन्धनजनकान् शत्रून् प्रत्यवस्थाय भस्मीकुरु ।

अस्मिन् मन्त्रे प्रयुक्तं प्रतीकात्मकं 'घृत' पदं विशेषव्याख्यानमर्हति । घृ क्षरणदीप्त्योरित्यस्य क्तान्तं रूपं घृतमिति । लोके तु घृतं क्षरणसर्पणशीलत्वाद् 'घृत'मिति' सर्पि'रिति चोच्यते, भवति च क्षरितं घृतं दीप्तिमदपीति घृधातो द्वितीयोऽर्थोऽपि तत्र सङ्गच्छते । किन्तु वेदे आध्यात्मिकेऽर्थे घृतपदं मनसो दीप्तेः, मानसिकविशदतायाः, दीप्त (प्रकाशित) मनसो दीप्तधियो वा प्रतीकम् । वेदवचसां स्थूले बाह्यार्थे सर्पिर्वाचकं सदपीदं पदमन्तरर्थे मनसो धियो वा विशदतां दीप्तिं च, प्रकाशितं मनः प्रकाशितां धियं वा सङ्केतयति । सन्त्यन्यान्यपीदृंशि गो-अश्व-उषस्-अग्नीन्द्र—सोमसूर्यादिपदानि वेदे, यानि यौगिकत्वम् अत्यजन्त्यपि नियते गुह्यार्थे प्रयुक्तानि सर्वत्र । वेदरहस्यसमुद्घाटनकुंचिकायमानानि चैतानि पदानि 'प्रतीकानि' 'सङ्केत (साङ्केतिक) पदानि', 'सङ्केताः' इति वा वक्ष्यन्तेऽस्माभिरुत्तरत्र ।

ऋग्वेदे प्रथममण्डलस्य द्वितीयसूक्तसप्तममन्त्रे एव सर्वप्रथमं प्रयुक्तं 'घृत' पदं 'घृताचीम्' इति समस्तपदाङ्गत्वेन । तत्र च 'घृताचीम्' इत्यस्य शब्दस्य धियो विशेषणत्वात् (धियं घृताचीं साधन्ता) घृतेन दीप्त्या अर्थात् प्रकाशेनाञ्चितां धियमित्येवार्थः उपपद्यते नान्यः । एवं 'घृत' पदप्रयोगवतामन्येषामपि सन्दर्भाणां परीक्षणेन श्रीअरबिन्दकृतः 'घृतस्य' साङ्केतिकोऽर्थः सुदृढं समर्थितो भवति । एतदेव च गो-अश्वादिशब्दानां गूढार्थप्रामाण्यविषयेऽपि बोध्यम् ।

व्याकरणम्

१ घृत-आहवन । घृतेनाऽऽहूयते इति विग्रहे 'कर्तृकरणे कृता बहुलम्' इति समासः । आहूयत इत्याहवनः । कर्मणि ल्युट् छान्दसः । यद्वा, कृत्यल्युटो बहुलमिति बाहुलकाल्ल्युट् । घृताहवन इति प्रातिपदिकात् सम्बुद्धौ रूपम् ।

२ दीदि-वः । दीप्त्यर्थकाद् दीप्यते र्लिटः क्वसुः ।

**अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ।
हव्यवाड् जुह्वास्यः ॥६॥**

१ अग्निना । २ अग्निः । ३ सम् । ४ इध्यते । ५ कविः । ६ गृह-पतिः । ७ युवा । ८ हव्य-वाट् । ९ जुहु-आस्यः ॥

1 By the fire. 4 is. 2 the fire. 3 perfectly. 4 kindled. 5 the seer. 6 the lord of the house. 7 the youth. 8 the bearer of

offering. 9 whose mouth receives the offerings

२ भगवत्सङ्कल्पाधिष्ठाताऽग्निर्देवः समष्टिगतः। १ व्यष्टिगतेन यजमानान्तर्निर्मथिताग्निना, दिव्य-सङ्कल्पाग्निनैव। ३ सम्यक्। ४ प्रदीप्यते। कीदृशोऽग्निः ? ५ क्रान्तदर्शी ऋषिः। ६ देहगृहस्य स्वामी। ७ चिरयौवनः, नित्यनवशक्तिसम्पन्नः। ८ हविःप्रापकः। ९ ज्वालात्मकजिह्वारूपमुखोपेतः।

भावार्थः

भागवतसङ्कल्पाधिपतिर्देवोऽग्निर्हि अतीन्द्रियार्थदर्शी ऋषिः। योऽन्तर्यामिकस्तस्मै स्वात्मानं स्वात्मीयं च सर्वं समर्पयति, तस्य गृहस्य, वासस्थानस्य, देहगेहस्यान्तर्मन्दिरस्य च पती रक्षकः प्रभुश्च भवत्यसौ नित्ययुवाऽजरामरशक्तिमयोऽग्निः। स यजमानस्य हव्यानि वहति देवान् यथायथम्। ज्वालाजिह्वामयं हि तस्यास्यं यद् यजमानस्य हविर्गृह्णाति यस्मिंश्च यजमानेन सततं हवनीयाः स्वदेहप्राणमनसां तत्क्रियाणां च समिधः प्रदीपनार्थं प्रकाशप्राप्त्यर्थं वा। एवम्भूतोऽसौ परमात्माग्निरात्माग्निना, अस्मदन्तःस्थदिव्यसङ्कल्पाग्निनैव प्रदीप्यते, सकृत् प्रदीपितश्च प्रदीप्ततरो भवत्युत्तरोत्तरम्।

व्याकरणम्

४ इध्यते। ञिइन्धी दीप्तौ इत्यस्मात् कर्मणि लट्प्रथमपुरुषैकवचनम्।

९ जुहु-आस्यः। जुह्वति अस्यां हविरिति जुहूर्जिह्वा, अग्नेर्ज्वाला, सैवास्य जिह्वा। 'हुवः श्लुवच्च' इति क्विप् औणादिकः। जुहूः अर्थात् ज्वालारूपिणी जिह्वा एव आस्यं मुखं यस्य सः।

कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे।
देवममीवचातनम् ॥७॥

१ कविम्। २ अग्निम्। ३ उप। ४ स्तुहि। ५ सत्य-धर्माणम्। ६ अध्वरे। ७ देवम्। ८ अमीव-चातनम्॥

2 To the divine flame. 1 the seer. 5 him whose law of being is the truth. 7 the shining one. 8 the destroyer of all evils. 3 approach. and 4 chant the hymn of praise (6 at the pilgrim-sacrifice.)

६ ऊर्ध्वसत्यधामपथिके यज्ञे। १ अतीन्द्रियार्थद्रष्टारं। ५ सत्यात्मकधर्मयुक्तम्। ८ सर्वविधदुरितविनाशकं। ७ दीव्यन्तं प्रकाशमानं दिव्यं वा। २ अग्निम्। ३ उपेत्य। तस्य ४ स्तोत्रमुपगाय।

भावार्थः

हे अन्तर्यागकारिन्! ऊर्ध्वारोहणयात्रारूपिणि, दिव्यपथस्य प्रदातरि यज्ञे त्वं क्रान्तदर्शिनं, सत्यधर्माणं, प्रकाशमयं, सर्वदुरितापहं दिव्याग्निमुपगम्य तस्य स्तुतिगानं कुरु।

व्याकरणम्

८ अमीव-चातनम्। अम रोगे इत्यस्माच्चौरादिकात् 'शेवयह्वजिह्वा०' इत्यादिना उणादिसूत्रेण (१.१५२) 'वन्' प्रत्ययः ईडागमश्च निपात्येते।

पदमिदं नान्तमकारान्तं स्त्रियामाबन्तं च त्रिधाऽपि प्रयुक्तं दृश्यते। तत्र निपातनाद् बाहुलकाच्च यथाभिमतरूपसिद्धिरास्थेयेति दिक्।

अथोत्तरपदम्। चातयति विनाशयतीति चातनः। चते याचने इत्यस्मात् णिजन्तात् 'नन्दिग्रहि-पचादिभ्यो ल्यु०' (पा. ३.१.१३४) इत्यादिना कर्तरि ल्युः। योरनादेशः। णेरनिटीति णेर्लोपः। अमीवानां रोगादिदुरितानां चातनस्तम्। षष्ठीतत्पुरुषः। धातूनामनेकार्थत्वात् चतिरत्र हिंसार्थकः।

यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति।
तस्य स्म प्राविता भव ॥८॥

१ यः। २ त्वाम्। ३ अग्ने। ४ हविः-पतिः। ५ दूतम्। ६ देव। ७ सपर्यति। ८ तस्य। ९ स्म। १० प्र-अविता। ११ भव॥

3 O Flame. 6 O divine. 5 messenger. 4 the lord of the offerings. 1 who. 7 waits on. 2 thee. 8 of him. 11 become. 10 the protector. (9 expletive)

६ हे तपोदेव। ३ अग्ने! ४ बाह्यान्तर-हव्यानां स्वामी। १ यः। अन्तर्याजी। ५ दूतम्। २ त्वाम्। ७ उपास्ते। ८ तस्य हविष्मतः। त्वम् १० रक्षिता। ११ भव। (९ 'स्म' इति पादपूरकः)।

भावार्थः

भगवते समर्पणार्थं सिद्धानि देहप्राण-मनांसि, तेषां नानाविधा अवस्था व्यापाराश्चैवान्तर्यागस्य हवींषि, अर्पणीयद्रव्याणि। हे अग्ने! दिव्यदूत! एषां हविषां पति र्यो यजमान, इमानि सिद्धीकृत्य त्वामुपतिष्ठति, एतत् सर्वस्वसमर्पणार्थं, तस्य त्वं रक्षको भवसि, भव चेति प्रार्थना।

व्याकरणम्

४ हविः-पतिः। हविषां पतिरिति हविष्पतिः षष्ठीतत्पुरुषः। ९ स्म। स्मेति पादपूरणः।

१० प्र-अविता। अवतीत्यविता रक्षकः। अव रक्षणादिषु इत्यस्मात् प्रपूर्वात् 'ण्वुल्तृचौ' (पा. ३.१.१३३) इति कर्तरि तृचि इडागमः। प्रथमैकवचनम्।

यो अग्निं देववीतये हविष्माँ आविवासति। तस्मै पावक मृळय ॥९॥

१ यः। २ अग्निम्। ३ देव-वीतये। ४ हविष्मान्। ५ आ-विवासति। ६ तस्मै। ७ पावक। ८ मृळय॥

He. 1 who. 4 with the offerings. 5 approaches. 2 the divine force. 3 for the birth of the Gods. 7 O purifier. 6 on him. 8 have grace.

७ हे पवित्रीकारक अग्ने! १ यः। ४ हविषां स्वामी, प्रभूतहविरुपेतो यजमानः। ३ देवानां जन्मने। २ दिव्यतपःशक्ति त्वाम्। ५ उपगच्छति परिचरति च। ६ तस्मिन्। ८ अनुग्रहं कुरु।

भावार्थः

योऽन्तर्याजिकः स्वात्मनि देवानामाविर्भावाय हव्यैः सह भागवतसंकल्पशक्तिमुपयात्युपास्ते च, हे परिशोधक अग्निदेव! तस्मिन् कृपां कुरु, देवानां जन्म संसाध्य तं कृतार्थय।

व्याकरणम्

३ देव-वीतये। वी गतिव्याप्तिप्रजनकान्त्यशन खादनेषु इत्यतः स्त्रियां भावे क्तिनि वीतिशब्दो निष्पद्यते। वीतिरर्थात् प्रजनः, जन्म प्रादुर्भावो वा। देवानां वीतिर्जन्म तस्यै।

५ आ-विवासति। आवातुमागन्तुमुपगन्तुं वेच्छतीति आविवासति। आङ्पूर्वकाद् 'वा' गतिगन्धनयोरित्यस्माद् आदादिकादिच्छार्थे सनि लट्प्रथमपुरुषैकवचनम्।

यद्वा, विवासति इति परिचरणकर्मसु पठितं निघण्टौ (३.५)। तस्माद् विवासते लटि रूपम्।

अग्निं प्रति आगमनेच्छा समीपगमनेच्छा वा परिचर्याप्रयोजना। अतश्च 'विवासतिः परिचर्याम्' (निरु० ११.३.१६) इत्यर्थः फलति।

८ मृळय। मृड सुखने इत्यस्मात् लोण्मध्यम-पुरुषैकवचने छान्दसं रूपम्।

(क्रमशः)

ऋषयो मन्त्राणां द्रष्टारः कर्तारो वा ?

श्री प्रा० भद्रसेनः

वेदानां प्रत्येकस्य मन्त्रस्य सूक्तस्य वोपरि केषां शब्दानां संकेतो भवति, तेषु-एक ऋषिरपि। ऋषिशब्देन किं गृह्यतेऽत्र ? अस्मिन् विषये त्रयः पक्षाः प्राप्नुवन्ति। प्रथमः—ऋषयो द्रष्टारः, द्वितीयः—कर्तारः, तृतीयश्च पक्षो मन्त्रार्थपरिचायकं, सारबोधकं, गुणवाचकं, यौगिकं पदमिति—ऋषिः।

प्रथमः पक्षः—अति प्राचीने काले वेदाः कर्णपरम्परया श्रूयन्ते स्म, न तु पुस्तकैः पठ्यन्ते स्म, पुस्तकाभावात्। बुद्धीनां प्रखरत्वात् श्रवणपरम्परयैव स्मरणाध्ययने सम्पद्येते। अत एव श्रुतिः, अनुश्रवनामभ्यां वेदा निर्दिश्यन्ते। ऋषिभिरपि पूर्वजैः श्रुतम्, प्राथमिकैरग्निवायुप्रभृतिभिः परमेश्वरादेव स्वहृदयेषु श्रुतम्-प्राप्तम्। अत ऋषयो न मन्त्राणां कर्तार अपि तु केवलं मन्त्रार्थस्य द्रष्टारः।

समस्तस्य संस्कृतसाहित्यस्यावलोडनेनावगम्यते यद् वेदा ईश्वरीयं ज्ञानम् न तु ऋषीणाम्। ईश्वरो नित्यस्तस्य ज्ञानमपि नित्यम्। ऋषिभिस्तु केवलं प्रकाशनं कृतम्। अत एव स्थाने स्थाने परमेश्वरो निर्मातृत्वेन निर्दिष्टः। तद्यथा——

"तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे," यजुः ३१, ७। यस्मादृचो अपातक्षन्, यजुर्यस्मादपाकषन्, अथर्व १०, ७, २०। एवं वा अरेऽस्य महतो भूतस्य निःश्वसितम् ऋग्वेदो यजुर्वेदः, शतपथ १४,४,३,१०"

साहित्ये बहुत्र 'ऋषि द्रष्टा' इत्थं वर्णनमपि प्राप्नोति। ऋषिर्दर्शनात्, स्तोमान् ददर्शेत्यौपमन्यवः, तद्यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्, तत् ऋषयोऽभवंस्तदृषीणामृषित्वमिति ह विज्ञायते। निरुक्तम् २,११।

मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यतीति तेभ्य एतं तर्कं प्रायच्छन् मन्त्रार्थचिन्ताऽभ्यूहमभ्यूलहं, तस्माद्यदेवं किञ्चानूचानोऽभ्यूहत्यार्षं तद्भवति। नि. १३,१२।

एवमुच्चावचैरभिप्रायै ऋषीणां मन्त्रदृष्टयो भवन्ति, नि० ७,४। ऋषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता नि० १०,१०।

न्यायदर्शनस्य भाष्यकर्तुः श्री वात्स्यायनस्य वचनेनापि प्रमाणी भवति, यत् ऋषयो द्रष्टारः—तद्यथा—य एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च ते खलु इतिहासपुराणस्य धर्मशास्त्रस्य चेति कर्तारः।

य एव आप्ता वेदार्थानां द्रष्टारः प्रवक्तारश्च त एव आयुर्वेदप्रभृतीनामिति न्या०भा० २, ६२, ६७, अत्र मन्त्रशब्देन सह द्रष्टृपदं सम्बद्धं वर्तते।

यत्र कुत्रापि मन्त्रकृत् शब्दः प्रयुक्तः, स न कर्तृत्वेन अपि तु कृञ् धातु अनेकार्थत्वेन वर्तते। तदैव श्रीसायणः प्राह-ऋषिरतीन्द्रियार्थद्रष्टा मन्त्रकृत् करोतिर्धातुस्तत्रदर्शनार्थः। अतो न कर्तृत्वे एव। यद्यपि अपौरुषेयवेदे कर्तारो नैव सन्ति, तथापि कल्पादौ विश्वेश्वरानुग्रहेण मन्त्राणां लब्धारो मन्त्रकृत् इत्युच्यन्ते तै० ब्रा० ४, १,१। एवमेव यजुर्वेदभाष्यकारः श्री उव्वटः ७, ४६ भाष्ये

लिखति–ऋषयो मन्त्राणां व्याख्यातारः। बोधायनधर्मसूत्रस्य २,६,३६ भाष्ये गोविन्दस्वामी-ऋषिर्मन्त्रार्थज्ञः। मनुस्मृतेर्भाष्यकारो मेधातिथिः ऋषिर्वेदस्तदध्ययनेन तद् विज्ञानेन तदर्थानुष्ठानातिशययोगात्, पुरुषेऽपि ऋषिशब्दः।

ऋषिशब्दस्य अर्थो मन्त्राणां कर्ता इति स्वीकृते तु, इमा विसंगतयः समागच्छन्ति।

वेदमन्त्राश्च ऋषिभ्यः पूर्वतनाः सन्ति, कथं पुनः ऋषयस्तेषाम् कर्तारो भवितुमर्हन्ति। यथा तै. सं., मै. सं. ऐ. ब्रा. ग्रन्थेषु एका कथा मिलति—एकदा मनुमहोदयेन स्वकीया सर्वा सम्पत्तिः स्वपुत्रेषु विभक्ताः। कनिष्ठो नाभानेदिष्ठो गुरुकुलात्प्रतिनिवृत्य स्वं भागं ययाचे, तस्य पित्रा मनुनोक्तम्, यदिमे द्वे सूक्ते (१०, ६१-६२) स्तः, अनयोराङ्गिरसयज्ञे व्यवहारो विधेयः। तत्र प्राप्ता दक्षिणा तव भागो भविष्यति, अनयोः सूक्तयोः ऋषिर्नाभानेदिष्ठः परं कथातः पिता प्रदाता। अतः कथञ्चित् पिता तु अनयोः कर्ता स्यादपि परं नाभानेदिष्ठः कथं सेत्स्यति।

तान् वा एतान् सम्पातान् विश्वामित्रः प्रथममपश्यत् तान् विश्वामित्रेण दृष्टान् वामदेवोऽसृजत् गो० ब्रा० १, ६, (ऐ० ब्राह्मणेऽपि) एतत् कथनम् ऋ ४,१९ विषये वर्तते। ऋक्सर्वानुक्रमणिकायां वामदेव ऋषिः तर्हि विश्वामित्रेण पूर्वदृष्टस्य वामदेवः कथं कर्ता भवितुमर्हति।

कस्य नूनं ऋ१,२४ सूक्तस्य आजीगर्तो देवरात (शूनशेपः) ऐ. ब्राह्मणे (३३,३,४,) ऋषिर्निर्दिष्टः परं निरुक्तसमुच्चये अजीगर्तः स्मृतः। उभयत्र ऋषिनाम्नि भेदो वर्तते, तदा कर्तृदिशा कथं संगतिः स्यात्।

एकस्य सूक्तस्य अनेके कर्तारः कथं भवितुमर्हन्ति, तद्यथा ऋ :९, ६६ सूक्ते ३०मन्त्राः सन्ति तत्र ऋषिः—शतं वैखानसा निर्दिष्टाः।

अनेकमन्त्रसूक्तानामनेके ऋषयः प्राप्नुवन्ति, एकस्मिन् सूक्ते बहूनां मन्त्राणां यदा भिन्नो-भिन्नऋषिर्भवति, तदा तैः सह मन्त्रसंख्याया निर्देशः क्रियते। परन्त्वात्र ९,६६ निर्दिष्टम्। अतो विज्ञायते सर्वे ऋषयो द्रष्टारः। बहुत्र वा, च निपातयोः प्रयोगः क्रियते, स च दर्शने संगच्छते, न तु करणे।

ऋ १,१००, सूक्ते १९ मन्त्राः, तेषां पञ्च ऋषयः। सप्तदशमे मन्त्रे सर्वेषां नामानि सन्ति। यदि ते कर्तारः ? तर्हि भिन्नेषु भिन्नेषु मन्त्रेषु भवेयुः।

एकस्य मन्त्रस्य विविधेषु स्थलेषु समागते सति अपि तस्य ऋषयः प्रायः सर्वत्र भिन्नाः प्राप्नुवन्ति, तर्हि कर्तृदृष्ट्या कथमस्य समाधानम् ?

ऋषिर्मन्त्रनिर्माता, इति स्वीकृते मन्त्रस्थ कालवचनयोः का संगतिर्भविष्यति।

श्रौतगृह्यसूत्रेषु मन्त्रकृत् शब्दो बहुधा प्रयुज्यते, परं मन्त्रकालस्तु तेभ्यो बहुप्राचीनतमः। तर्हि कथमत्र अर्थसंगतिः सेत्स्यति।

यथा—दक्षिणत उदङ्मुखो मन्त्रकारः मा. गृ. १,८,२। यदि ऋषिभिर्निर्मितो वेदो भवेत्, तर्हि मन्त्रस्य ऋषेः पराशरस्य पुत्रः कथं वेदं नित्यं वदेत्। अतः पराशरस्तस्य मन्त्रस्य द्रष्टैव।

शाकल्य–जैमिनिसमकालिको भाम्यंश्वमुद्गलः ऋ १०,१०, २ मन्त्रस्य ऋषिः, यदि स तस्य कर्ता भवेत् तर्हि तत्समकालिको जैमिनिः कथं नित्यं स्वीकुर्यात्।

किं बहुना समस्तवेदवेदाङ्गोपाङ्गानाञ्च सूक्ष्मदृष्ट्या अवलोकनेन विज्ञायते, यत् ऋषयो मन्त्राणां द्रष्टारो न तु कर्तारः। ऋषिर्दर्शनात्, साक्षात्कृतधर्माण ऋषयो बभूवुः। कर्ता तु परमेश्वर एव नान्यः कश्चित्।

तर्हि मन्त्रकृत् शब्दस्य कोऽर्थः?

यथा लोहकारः स्वर्णकारो वा न लोहस्वर्णयो र्निर्मातारौ परं रूपप्रदातारौ भवतः। तथैव मन्त्रकृत् न मन्त्रस्य कर्ता, अपि तु द्रष्टा, भावप्रकाशकः। आम् मालाकारो मालां निर्मिमीते, परं न तेनापि पुष्पाणि निर्मीयन्ते, मालारूपेण संयोजनं विधीयते।

ते देवा अब्रुवन् इषाव (वाव) पिता यो मन्त्रकृदिति ता. ब्रा. १३, ३, २५ शिशुर्वाऽङ्गिरसो मन्त्रकृतां मन्त्रकृदासीत्। स पितॄन् पुत्रका इत्यामन्त्रयत्। अस्यैव समानपाठो मनुस्मृतौ प्राप्यते---

अध्यापयामास पितॄन् शिशुरङ्गिरसः कविः।
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान्॥२,१५१॥
अज्ञो भवति वै बालः पिता भवति मन्त्रदः।१५२।

आभ्यां प्रकरणाभ्यां सिध्यति यत् मन्त्रकृत्—मन्त्रदः समानार्थकौ। अत्र विद्यायाः ज्ञानस्य, विचारस्य वा प्रदाता एव मन्त्रकृत्, मन्त्रदो वा निर्दिष्टः। मन्त्रणां (परामर्शं) ददाति यः स मन्त्रदः=परामर्शदाता।

यस्य वाक्यं स ऋषिः—

कात्यायनः, इत्यनेन प्रतीयते, यत् ऋषिर्मन्त्रकर्ता, परं तत्रैव कथितम् गृत्समदो द्वितीयं मण्डलमपश्यत्। अतः पूर्ववचनस्य दर्शनमेवाभिप्रायः। अत एवोच्यते—स (प्रजापतिः) एतामृचमपश्यत् ऐ. ब्रा. २,१६ एतत्कवषः सूक्तमपश्यत् ऐ. ब्रा. ३,१९ अत्र द्रष्टा स्पष्टं प्रतिपादितम्। तथा च दृष्टं साम पा. ४,२,७, सूक्ते, अग्निना दृष्टं साम आग्नेयम्। उशनसा दृष्टं साम औशनसम्, अत्रापि यो मन्त्रमपश्यत, तस्य तेन नाम्ना नामकरणं वर्तते। श्री पतञ्जलिः प्राह 'न हि छन्दांसि क्रियन्ते, नित्यानि हि छन्दांसि ४,३,१०१।

अतो मन्त्रस्य तदर्थस्य वा अध्यापको मन्त्रकृदिति, मन्त्रस्य विनियोगकर्ता, यज्ञे मन्त्राणां प्रयोजनवेदयिता, मन्त्रस्य द्रष्टा, साक्षात्कर्ता, तत्प्रचारकश्च वा मन्त्रकृत्। नूतनस्य भावस्य बोद्धा-ज्ञापयिता वेत्ता मन्त्रकृदिति 'करोति अयमभूतप्रादुर्भावे दृष्टः-श्री पतञ्जलिः ६,१,६।

द्वितीयः पक्षः—

ऋषयो मन्त्राणां कर्तारः। ऋषयो मन्त्रकृतां स्तोमैः कश्यपोद् वर्धयन् गिरः ऋ० ९, ११४, २, विज्ञायते च ऋषेर्ऋषेर्वा एता निर्मिता यत् सामिधेन्यः आप श्रौ. २४, ११, १० सुकर्मपापमन्त्रपुण्येषु कृञः पा. ३, २, ८, यस्य वाक्यं स ऋषिः का. सर्वानु० १,२४। एभिः प्रमाणैः ऋषयो मन्त्रकर्तारः सिद्ध्यन्ति अत एव मन्त्रकृत्, मन्त्रकारः, मन्त्रकारः, मन्त्रवान्, मन्त्रपतिरिति, तेषां कृते प्रयुज्यन्ते। तथा शान्तरक्षितबौद्धस्तत्त्वसंग्रहे प्राह—महर्षयो वेदानां कर्तारो मन्त्राणां प्रवर्तयितारः। मज्झिमनिकाय २, ५, ६ स्थलेऽपि एष एव भावः प्राप्नोति। अर्थात् एभ्यः पूर्वमेषा धारणा आसीत्, अत एव एभिरित्थं प्रतिपादितम्।

निरुक्ते बहुत्र इयं धारणा परिपुष्यति, यद् यास्कः ऋषिं मन्त्रकर्तृत्वेन गृह्णाति—एकः सुपर्णः—तं पाकेन मनसा अपश्यमन्तितः, अत्र यास्कः प्राह—ऋषे र्दृष्टार्थस्य प्रीतिर्भवति, आख्यानसंयुक्ता १०,४,३१। मन्त्रस्य-आख्यानस्य निर्देष्टा ऋषिरेव

सिध्यति । इन्दुशब्दस्य प्रसंगे १०,४,२७-अभ्यासे भूयांसमर्थं मन्यन्ते, यथाहो दर्शनीयाहो दर्शनीय इति तत् परुच्छेपस्य शीलं । परुच्छेपस्य इयं रचना, अत एव तस्य शीलं कथितं यदि कोऽपि वदेत्, अत्र नाम्नो निरुक्तिर्वर्तते, निरुक्तिस्तु नाम्नाम-द्यत्वेऽपि विधीयते ।

यत्काम ऋषिर्यस्यां देवतायामर्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते । तद्-दैवतः स मन्त्रो भवति । अत्र स्तुतिकर्ता ऋषिर्निर्दिष्टः । नि. ६,५,१०७-जल्हवः शब्दनिर्वचनावसरे यास्कः प्राह–ऋषिरवोचत् । ६, १, ४–अक्षाः–ऋषेरक्षपरिद्यूनस्य एतदार्षं वेदयन्ते, हिरण्यस्तूपशब्दप्रसंगे-सूक्तं प्रोवाच, इति विन्यस्तम् ।

तृतीयः पक्षः—

मन्त्रसम्बद्धा ऋषयो, न तु द्रष्टारो न च कर्तारः, अपितु मन्त्रार्थस्य परिचायकत्वेन साररूपेण बोधकाः शब्दा इति । अत स्तद्गुणवाचकं यौगिकं पदमिति ।

१–ब्राह्मणकारा भाष्यकाराश्च ऋषिदेवता-छन्दसां वेदार्थे महत्त्वं स्वीकुर्वन्ति । ऋषिर्यदि द्रष्टा कर्ता वा स्वीक्रियते तर्हि तस्य वेदार्थाय न किमपि महत्त्वम् भवति, केवलं स्मरणार्थमेव महत्त्वम् ।

२–केषुचिन्मन्त्रेषु ऋषिनामानि प्राप्नुवन्ति । यथा–क–दशव्रजे, ऋ ८, ५, ६ । ख–कृत्व्ये धने ८, ४०, १० । ग–मेधेऽध्वरे दीर्घनीथे दमूनसि ८, ५०, १० । घ–बृहस्पतिं यज्ञमकृण्वत ऋषिम् १०, १३, ४ । एते ऋषिनिर्देशकाः शब्दाः विशेष्य-विशेषणरूपेण प्रतिभान्ति, न तु व्यक्तिवाचकत्वेन । यदि ऋषिर्द्रष्टा, कर्ता वा स्वीक्रियते, तर्हि मन्त्रस्थ पदस्य कथं समाधानं संगतिर्वा भविष्यति ।

३–अङ्गिरऋषिरेव प्रथमद्रष्टा, इति स्वीकृते सति, किं तस्मात्पूर्वं मन्त्रार्थस्य प्रकाशो न बभूव? यथा एकस्य मन्त्रस्य, वैवस्वत मनुः ऋषिः, स सप्तमे मन्वन्तरे, अतोऽस्मात्पूर्वं किं मन्त्रार्थस्य प्रकाशो नासीत् ।

४–एवं स्वीकृते सत्येव व्यक्तिवाचको विवादः शाम्यति । तथा च कपोत, मत्स्यादितिर्यक्प्राणि-नाम् नामसमाधानं जायते । अन्यथा किं पक्षिणोऽपि मन्त्रार्थद्रष्टारः कर्तारो वा । अथवा एतादृशानि नामानि किं शोभन्ते ?

५–यजु० १३, ५४-५८ एषु मन्त्रेषुऋषि-शब्दानां सामान्यार्थाः सन्ति ।

६–पदपाठे ऋषिनामानि-अवगृहीतानि सन्ति । यथा-मेध्याऽतिथिः, प्रियऽमेधाः, यदि व्यक्तिवाचकं पदं, तर्हि कथमवग्रहो विहितः ।

७–ऋ १०, १२६ अंहोमुक् ऋषिः, सूक्ते पापनिवारणविचारः । अतः ऋषिमन्त्रार्थयोः कश्चन सम्बन्धो वर्तते । व्यक्तिवाचकत्वे न कापि संगतिः ।

८–१०,७२ सूक्तस्य, देवता एव ऋषिः । तदा द्वयोः को भेदः, आमयं विचारणीयो विषयो-ऽस्मिन् पक्षे । अतः सिद्धं यत् ऋषिशब्देन मन्त्राणां द्रष्टा कर्ता वा न ग्राह्यः । अपि तु मन्त्रस्य सार एवाभिप्रायः । पुनरपि साहित्ये त्रयाणामेव पक्षाणां समर्थनं प्राप्नोति ।

भारतविभूतिः पं० श्री लेखरामः (आर्यपथिकः)

श्री हजारीलाल शास्त्री (विद्यालंकारः)

(१)
आर्ये समाजे बहुलब्धमानः
प्रचारकार्ये प्रथमः प्रधानः ।
प्रदाय प्राणान् बलिदान वेद्यां
दिवं गतः श्रीयुतलेखराम. ।।

(२)
श्रीमानसौ पञ्चनदीय जेह्लुम्
सुमण्डले सैदपुरेऽजनिष्ट ।
एकोनविंशे शतके तु पञ्च-
दशोत्तरे विक्रमवत्सरे च ।।

(३)
चैत्राष्टमीके सुदिने सुजन्म
लब्ध्वार्यवीरः सुमनो विभूतिः ।
सारस्वते ब्राह्मणपूतवंशे
परां प्रसिद्धिं समुपेत आर्यः ।।

(४)
उर्दूं सुभाषां प्रपठन् स्वबाल्ये
ज़ातः प्रवीणः प्रियलेखरामः ।
तारुण्यमाप्ते नगरस्य रक्षा-
पदाधिकारीति पदे नियुक्तः ।।

(५)
षट्त्रिंशवर्षे समभूद् विवाहो
लक्ष्मीति नाम्न्या सह पण्डितस्य ।
स्वधर्मपत्न्या सह वीरआर्यः
सामाजिके कार्यविधौ प्रवृत्तः ।।

(६)
समस्तदेशे खलु भारतेऽसौ
धर्मप्रचारायार्यवरो भ्रमन् ।
ईशामशीयै र्यवनैश्च सार्धं
शास्त्रार्थवादं कुरुते स्म धीरः ।।

(७)
अस्थापयत् श्रीयुतलेखरामः
पेशावरे चार्यसमाजसंस्थाम् ।
शुद्धिप्रचारेण चकार हिन्दून्
चेशामशीयान् यवनाननेकान् ।।

(८)
शास्त्रार्थवादे प्रियपण्डितोऽसा-
वीशामशीयानथ पारसीयान् ।
ग्रन्थांश्चखण्डे निजतीव्रबुद्ध्या
निर्भीक आर्यः प्रियलेखरामः ।।

(९)
हा! हन्त! चान्ये यवना ह्यनार्या
आर्यं सुवीरं परिहन्तुकामाः ।
चेष्टाः प्रचक्रुर्विविधा मलीनाः
पिपीलिका पश्यति छिद्रमेव ।।

(१०)
हा हन्त ! चैकः कपटाभ्युपेत
आर्यं निहन्तुं यवनो निकृष्टः ।
उपासदत् शुद्धिमिषेण धूर्तः
श्री लेखरामं करुणानिधानम् ।।

(११)
संकेतितो मित्रवरै रनेकैः
श्री लेखरामश्छलिनि ह्यमुष्मिन् ।
विश्वस्य चासावुपदेशवाणीं
दातुं प्रवृत्तः खलु वामनाय ।।

(१२)
हा चैकदासौ धृतकौक्षिकेय
आर्यं निहन्तुं समुपस्थितोऽभूत् ।
नराधमो हा! छुरिकां विषाक्तां
श्री लेखरामोदरमध्यमाधात् ।।

(१३)

हा! लेखरामोदरमध्यभागा-
च्छस्त्रेण छिन्नाद् रुधिरस्य धारा।
हा! हा! लपन्तीं जनतां रुदन्तीं
विस्मापयन्तीं वहते स्म वेगात् ॥

(१४)

हा! हाऽऽततायी प्रियधर्मपत्नी-
मार्यां तदीयामपि संप्रहृत्य।
विमोच्य चात्मानमहो! द्रुतं हा!
दुद्राव नीचः क्षुरिकां दधानः ॥

(१५)

कृतोपचारेऽपि न रक्तधारा
रुद्धाभवद् हन्त! समाजसेवी।
हा! हा! रुदन्तीं जनतां समस्तां
विहाय यातो दिवमार्यवीरः ॥

(१६)

आर्यैः समस्तैरवरोधनीयं
न लेखकार्यं सततं स्वकीयम्।
इत्यार्यजातिं प्रति धर्मवीर-
स्यार्यस्य संदेश इयाननन्यः ॥

प्रशस्तिः (महाकविशतकात्)

प्रणेता—कवीशरामकैलाशपाण्डेयः, एम० ए०, शास्त्री, लब्धस्वर्णपदकः

साकेते जन्म लब्ध्वाऽतिविमल-
धिषणो ह्यश्वघोषो जगत्यां,
कीर्तिं स्वामाततान प्रमथित-
सुगतप्रोच्च सिद्धान्तवागर्थः।
नन्दान्ते सौन्दराद्ये विलिखित-
मथवा चान्यकाव्येऽपि तेन,
यन्नूनं तन्न काव्यं परमथ
भणितं दर्शनस्य प्रसिद्धम् ॥

त्यक्त्वा वेदोक्तमार्गं धृत-
सुगतमतः स्फारयन्धर्मघोषम्,
बौद्धान्तः सम्प्रविष्टः कविकुल-
सुलभां कल्पनां संदधानः।
शास्त्रे सम्प्राप्तमानो विदित-
बहुनयो नव्यरीतिं च तन्वन्,
जेजेत्यस्यां धरायां कविकुल-
नृवरैरादृतस्त्वश्वघोषः ॥

भुभर्तुः श्रीधरस्यारचितमनुपमं
राजधान्यां वलभ्या-
मापूर्णं शब्दविद्यामतपटु-
नियमैर्भट्टिकाव्यं निगूढम्।
यद्भट्टेस्तन्नितान्तं बुधवर-
मनसां प्रीतये वर्ततेऽद्धा,
नैवानन्दं लभन्ते विरहित-
धिषणाः शब्दबोधाकरेऽस्मिन् ॥

श्रीकृष्णस्यानवद्यैः शशिकर-
विमलैः कर्मभिर्व्याप्तपृष्ठम्,
प्रौढं वाग्जालजुष्टं मुखरित-
ममलं नारदस्योक्तियुक्त्या।
लघ्वाख्यानेन युक्तं त्वपि ननु
नितरां विस्तृतं पूतवृत्तं,
दैवीवाक्काव्यहेम्नो दृढनिकष-
निभं माघकाव्यं चकास्ति ॥

औद्धत्यं शैशुपालं विदलितनृवरं संदिदीपे यदालं, यागे पाण्डोः सुतानां यदुकुलकमलाहस्कराहप्रसङ्गे।
शक्तिः सौदर्शनी द्राक् प्रकुपितभगवत्प्रेरिता प्रोद्यताऽभूच्चैद्यं चावद्यशौर्यं विचलितकरणं माघकाव्ये जघान ॥

भूस्वर्गः

श्री जगन्नाथ रिवू शास्त्री

अस्त्युत्तरस्यां दिशि भारतस्य–श्रीवासभूमिर्मुनिवाटिकायाम् ।
कश्मीरनाम्ना मुनिकश्यपेन–स्वर्निर्मिता-नन्दनवाटिकेव ।।१।।

या पर्वतैर्रम्यलताद्रुमैश्च–वनस्थलीभिश्च महौषधैश्च ।
सरित्तडागैर्जलजैः सरोभिः समावृता भूधरराजकुक्षौ ।।२।।

या सिद्धयोगेन्द्रमुनीन्द्रवर्यैः कवीन्द्रराजेन्द्रसुरेन्द्रवृन्दैः ।
संसेविता राजगणैश्च शासिता देवस्थली पर्वतराजकुक्षौ ।।३।।

गुञ्जन्ति कूजन्ति हसन्ति भृङ्गाः खगा जनाः पुष्पलताद्रुमेषु ।
सैषा वसन्ते सुखदा नराणां कश्मीरभूमिर्शिशिरात्ययेषु ।।४।।

रमन्ति गायन्ति हसन्ति बालाः कुञ्जेषु नौकासु लताद्रुमेषु ।
विचित्रवेषैः परिभूषितास्ते स्वानन्दमग्नाः परितो भ्रमन्तः ।।५।।

पुष्पैः फलैश्शाद्वलवेदिकाभिः सा राजते भारतमूर्ध्नि स्वर्गः ।
परागयुक्तं पवनं च घ्रात्वा दृश्यं च दृष्ट्वा लभते सुतृप्तिम् ।।६।।

जले स्थले वा विहरन्ति भूरिशो नराश्च नार्यो जलवाहनादिभिः ।
बसै रथैः सैकलमोटरैस्तथा प्रवृद्धहर्षागतसाध्वसक्लमाः ।।७।।

कुञ्जेषु कूजन्ति कुलाय संस्थिता विहायसा केचनगन्तुकामुकाः ।
वृक्षेषु केचित्तृणपुष्पछादिताः पिकाश्शुकाभृङ्गगणाः समन्ततः ।।८।।

संपूर्णसस्याभरिता फलैश्च योमामहेशस्य विहारभूमिः ।
कश्मीरनाम्ना प्रथिता धरायां सा राजते कश्यपनन्दिनीव ।।९।।

सा वाटिक श्रीनगरीसमाख्या स्थिता वितस्ता तटयोर्महच्छ्रीः ?
प्रासाददेवालयहर्म्यरम्या विराजते सा बहुराजमार्गाः ।।१०।।

डलाभिधाने विमले सरोवरे निशातशालामरपादमूलये ।
पश्यन्ति तस्मिन्वनितामुखाम्बुजं-प्रफुल्लपद्मैः सह बिम्बितं जले।।११।।

सरोवरेऽस्मिन्विमले विशाले प्रफुल्लपद्मैर्खलु शोभिते च ।
नराः प्रियाभि विहरन्ति साकं नौकाविहारैः स्मरतापशान्त्यै ।।१२।।

शालागृहं मारवरासनं यत्सरोवरस्योत्तरभूमिभागे ।
रहो जहांगीरनृपोऽत्र बाहू चकारकण्ठाभरणं स्वनूरीम् प्रियां स्वां।।१३।।

सोऽयं जहांगीर नृपोऽत्र पूजामुमामहेशस्य चकार भक्त्या ।
फारसवाण्या सुमनोभिरामां पठन्ति गीतिं शबशाहिनाम्ना ।।१४।।

(क्रमशः)

प्लेटो : सामान्यपरिचयः

डा० हरिदत्त पालीवालः 'निर्भयः'

'प्लेटो' इति नाम्ना प्रसिद्धस्याचार्यस्य माता-पितृ कुले अतिप्रतिष्ठिते सम्भाविते चास्ताम्। प्लेटो विदुषो वास्तविकं नाम तु 'अरिष्टोकल्स' इत्येवासीत्, विशालवक्षस्कतयासौ समयेन 'प्लतोन' इत्युपाख्यां ययौ।

प्लेटो सुकरातस्य शिष्य आसीत्। तदाश्रममेवावसता तेन गुरुमरणं यावत् (ई० ३९९ या०) अध्ययनमकारि। तस्येच्छा राजनीतिकक्षेत्रेऽवतरणस्यासीत् किन्तु सुकरातस्य मृत्युदण्डेनास्मिन्क्षेत्रे तस्यारुचिरभूत्। गुरुमरणान्ते च स सद्य एव 'एथेन्स' नगरं तत्याज। 'मेगारा' नगरे कियत्कालं न्युष्य प्लेटो ग्रीस, मिश्र, इटली, सिसली-देशेषु सविशेषं पर्यटनं चक्रे। तस्य स्वीयमिदं कथनम्—यदसौ चत्वारिंशवर्षायुषि इटली-सिसली-यात्रां निरवहत्। तस्य च मनसि तत्रत्यानां सातिशयविषयासक्तिमयजीवनादरुचिरुदभूत्। अन्ततः स एथेंसं प्रत्याययौ। ईशात् ३८७ वर्षपूर्वं स प्रसिद्धं विद्यापीठं समतिष्ठिपत्।

चित्रमिदम्, यत्काव्यस्य कलानां च कटुविरोधवतोऽपि प्लेटो आचार्यस्य निजकार्यस्योपक्रमः काव्यनाटकरचनयाऽभवत्। तस्य कविताः कलात्मकदशात्यन्तमुत्कर्षं वहन्ति। किंवदन्तीयम्—यत् प्लेटो 'त्रासदी' प्रभृतिस्वरचनात्मककृतीः सुकरातस्य प्रभावे निपत्य, व्यनाशयत्। ततः स स्वात्मानं ग्रीसस्य पुनर्निर्माणाय दर्शनाध्ययनाय च समार्पिपत्। प्लेटोकृतस्यास्य निश्चयस्य त्रीण्यासन् कारणानि——(१) तस्य सामाजिकी स्थितिः, यत्र शासकवर्गसम्बद्धजने तथा सम्भावनाक्रियत, यत् स समाजसेवायै स्वं जीवनं समर्पयेत्। (२) सुकरातस्य मृत्युदण्डः, यः संकटस्य तात्कालिकतां प्रामाणयत् तस्य हृदयं च प्रसह्याऽपीडयत्। (३) तस्य जीवनानुभवाश्व।

प्लेटो स्वरचनासु विविधस्थलेषु स्वयमेतत्स्वीकृतवान्—यत् स राजनीतिक्षेत्रे सामाजिकजीवने च क्रियात्मकं विधातुं निरणैषीत् किन्तु तदानीं राजनीतिव्यपदेशेन क्रियमाणैरनाचारैः विशेषतश्च सुकराते दुर्व्यवहारेण तन्मनसि, राजनीतौ वैतृष्ण्यमरुचिश्च पदं लेभाते। जीवने कृतानुभवैः स दर्शन-प्रशस्ति-गानं प्रत्याकृष्टो बभूव। तेन च तस्यैषा धारणा बद्धमूला जाता यद्दर्शनज्ञानमेव नगराणां च हितं साधयितुं प्रभवति। तावन्मानवता कल्मषविमुक्ता न भविष्यति यावद् राज्याधिकारो दार्शनिकानां करगतो न भविष्यति, अथवा राजनीतिज्ञा यावद् दार्शनिका न भवन्ति।

जीवनस्य कट्वनुभवा एव प्लेटो-विचारधारां दर्शनोन्मुखीं कर्तुं दायित्वमवक्ष्यन्, यत ऐतिहासिकी प्लेटो-पृष्ठभूमिरिदं नानुमोदते। देश-काल-समाज-परिस्थितयो दर्शनविषये तं नियोजयितुमनुकूला नासन्। एथेंसस्य प्रख्यातपरिवारे युद्धस्य स्थितौ जन्मवतो जनस्य बौद्धिकस्थितिर्मर्यादाश्च सर्वथा अन्यथाऽन्यथा भवन्ति स्म।

सुकरातस्य वधं प्लेटो प्रतीकार-पण बन्ध रूपं मेने। तस्य निधनेन प्लेटो एकाकी भूत्वा स्वं लक्ष्यमधिकविशदं प्रेक्षाञ्चक्रे। संभवीदम्——'प्लेटो अन्वभूत्—यत्कर्तुं सुकरातो नापारि तन्मया पूरयितव्यम्, इति। अर्थात् मानवाचरणीयास्ते शाश्वताः सिद्धान्ता अन्वेष्टव्याः, यैः समाजे स्थायित्वेन सुखस्य राज्यस्य चोपलब्धिः सम्भवति। स निरचैषीत्—अहं सुकरातस्य सिद्धान्तानां प्रयोगं निषेधात्मकरूपेण दम्भ-मिथ्याचारविप्रतीकारहेतोरेव न, अपितु तेषां माध्यस्थ्येन न्याय-मिताचरणयोः

ससाहसं वास्तविकस्वरूपं प्रकटयन् तदनुकूलं न्याय-संविधानसम्बन्धिनो नियमान् रचयिष्यामि, अन्ततश्च तादृशे राज्यनगरस्य निर्माणं करिष्यामि, यद् भूमिः सत्यविवेकात्मकदृढाधारतां दधाना स्यात्। यत्कृते सुकरातस्य (यद्यसौ जीवितोऽभविष्यत्) पूर्णमनुमोदनमलप्स्यत।

प्लेटो व्यमृशत्--यत् सुकरातस्य मृत्युस्तदैव सार्थकतां यास्यति यदा तस्य सुहृदः शिष्याश्च तया घटनया प्रेरिताः सन्तः आत्मानं तदुद्देश्य-पूर्त्यर्थमेव समर्पयेयुः।

उक्तोद्देश्यं पुरोनिधाय प्लेटो ई० ३८७ लग्नभागं विद्यापीठविशेषस्य संस्थापनं व्यधात्। अस्मिन् विद्यापीठेऽध्ययनस्य विज्ञानानुसन्धानस्य चेत्युभयोः सुविधासीत्। अथ च तस्य निज-निर्देशेन न्याय-दर्शन-शास्त्र-गणित-प्राकृतिक-विज्ञानानां विधानस्य च शिक्षणं प्राचार्यत। सद्यः अस्य विद्यापीठस्य गौरवं न केवलं 'एथेन्सनगरे' सीमितम्, अपितु सर्वत्र यवन(यूनान)देशं व्याप्नोत्। ततश्च ५२९ ई० अब्दं यावदयं पीठो ज्ञानस्य विविधक्षेत्राणां नेतृत्वं कृतवान्। अस्मिन् विद्यापीठ एकतः शोधकार्याणां व्यवस्थासीत् अपरतश्च राजनीतिकवृत्ति संबन्धिप्रशिक्षणं सम्भावितकुलोत्पन्नानां नवयुवकानां कृतेऽदीयत।

एतानेवोद्देश्यान् दृष्टिसात्कुर्वन् प्लेटो प्रख्यातान् स्वसंवादग्रन्थान्व्यरचयत्, येषु 'विचार गोष्ठी' 'फीडो' (फीड्स) 'गणतन्त्रं, च, विशेषेण महत्त्वपूर्णं स्थानमलभन्त। वार्धके च न्यायशास्त्रीय सिद्धान्तानपि प्रणीतवान्।

आत्मनः कृतिषु प्लेटो सुकराताय पर्याय-विशेषेण दर्शनशास्त्रस्यात्मने वाणीमुपददौ। तस्य संवादेषु सत्यस्य कठोरप्रतिकारिपूर्णाग्रहग्रहिल-संपोषणेन सह तर्कविवेकपुष्टं व्याख्यानं प्रकाशते। प्रायशोऽसौ गूढरहस्यं विवृणोति। नवसिद्धान्तान् व्याकृत्य दोषाननु संदधाति तत्र। ततश्च तादृशान् सिद्धान्तानन्वेष्टुं प्रवर्तते, ये विवेकेन निर्विरोधमङ्गीकार्याः स्युः। प्लेटो दार्शनिकचिन्तनस्योपयुक्तसाधनं संवादमेवामन्यत। यतस्तन्माध्यमेनैवैतत्साधयितुं शक्यमासीत्, यत्सत्यस्योपलब्धिः सहयोगेनैव संभवति।

प्लेटो तादृशीं सत्तामचिक्लृपत्, याऽक्षय्या शाश्वती भवति, तन्मतेनैषैवेश्वरः। जगदिदं विनाशि परिणामि नयाननुधावति। सृष्टिरियं तादृशस्यादर्शभूतमूलप्रतिमानस्य प्रतिरूपमस्ति यत्स्वयं चिरन्तनं भवति, सैषा चेश्वरस्यैव कृतिः। अस्याः कृतेर्निर्माणस्यैकमात्रं कारणमीश्वरस्य सततप्रवृत्तउदारः पुरुषार्थोऽस्ति। प्लेटोऽमन्यत यत् केवलं शाश्वतं परमसत्तासंबद्धं ज्ञानमेवान्तिमं निश्चितं भवितुमर्हति। सृष्टिसंबन्धीनि सर्वविधानि ज्ञानानि तेषामनिश्चितत्वपरिवर्तनीयत्व-हेतोः प्रायोगिकानि निश्चयानवसायीन्येव च संभवन्ति। मानवस्य शाश्वतात्मनः प्रकाशं विवेक-सत्तानिर्माणं च स्वयं परमसत्ता (ईश्वर एव) कृतवती। शरीराणां नश्वराणामपरेषां च सावयवानां नक्षत्रग्रहतारादीनां निर्माणं परमेश्वर-निर्मित दैवतैरीश्वरप्रेरितैः कृतम्।

इदं स्वाभाविकमासीत्--यत् प्लेटो समग्रं स्व-सिद्धान्तनिरूपणमूलभूतममुमेव विमर्शममानयत्, यन्मानवजीवनस्य चरमं लक्ष्यं जीवनभौतिकसुख-साधनमात्रपरिसीमितं न, अपितु नीतिसंमुखीन-तर्कबुद्धेः, प्रतिव्यक्तिविवेकशीलप्रवृत्तेर्विकासोऽस्ति यत्सत्याभिज्ञाने सक्षमं भवेत्। प्लेटो सामान्यव्यवहारसंबन्धिनीं नैतिकतामन्याम्, दार्शनिक नैतिकतां च तदितरां समर्थितवान्। स प्रोवाच-यत् लोकप्रचलिता सामान्यव्यवहारोचिता नैतिकता सिद्धान्ततो निर्भ्रान्ता प्रामाणिकी च न भवति। यतस्तदाधारेण चरमसत्यान्वेषिणी

निश्चितान्तर्दृष्टि र्न भवति। प्रत्युत दार्शनिकी नैतिकता पूर्वोक्तान्तर्दृष्टिसमाश्रिता पूर्णतयान्तर्विवेकपुष्टा च भवति। यतो हि राजपुरुषस्य दायित्वं राष्ट्रात्मनः सुरक्षा च निर्माणं च भवति। ततो हि दार्शनिकनीतिज्ञ एव राजपुरुषाधिकारक्षमतां बिभर्त्ति। वास्तविकराजनीतिज्ञताया राष्ट्रिय चरित्रनिर्माणमेवार्थः। अर्थात् ऐकान्तिकनीतिसिद्धान्तानां धरातलप्रसारी प्रयोग एव।

पूर्वोक्तमान्यतानामनुकूलं प्लेटो जीवनस्य समस्तप्रयासेषु हार्दिकीनामनुभूतीनां रागात्मकप्रवृत्तिप्रतिक्रियाणां च महत्त्वं मानयन्नपि विवेकज्ञानादिबौद्धिकशक्तीनां महत्त्वं सर्वोपर्यमानयत्। ज्ञानस्य सत्तास्माकं संवेदनेषु न, प्रत्युतास्माकं तत्संबद्धनिर्णयेषु भवेत्। इत्येवं प्लेटो स्वीचक्रे।

प्लेटो कृतसिद्धान्तनिरूपणे सततमालोचनाया निषेधस्य च स्वर एतावान् मुखरोऽस्ति यत् तेषां पाठको विवेचनस्य विधेयात्मकमंशं स्वभावत उपेक्षितुं प्रवर्तते। तत्रैतिहासिको हेतुरयम्–प्लेटो कृतमान्यतानां विकासो विरोधाधृतोऽस्ति। सोऽन्वभवत्––होमर-होसिकद्-आदिकवीनां कृतिः सदसद्विवेकमकृत्वा यवन (यूनान) जनतान्धश्रद्धाभावैनागृह्णात्। अतः प्रकृत्या स कवीनामालोचनया स्वसिद्धान्तनिरूपणमुपक्रान्तवान्। प्लेटोकृतीनां पाठकस्तत्कृतविवेचने व्यर्थपाण्डित्यगन्धमनुभवेत्, यतोऽद्यास्मत्कृते होमरप्रभृतीनां ग्रीककवीनां तदेव महत्त्वं नास्ति, यत् प्लेटो दृष्टावासीत्। प्लेटो कवीनिमान् यावन (यूनानी) मस्तिष्कस्य संपोषकद्रव्यरूपेणामंस्त। स्वभावतस्तस्य लक्ष्यं कवीनां काव्यालोचनं तत्कृते नियमविधानं च निरपद्यत। अतएव तस्याधिकांशतो विवेचनं निषेधात्मकं प्रत्यफालीत्। एषं एव अरस्तू–प्लेटो गतो दृष्टिभेदोऽस्ति। अरस्तुर्वर्ण्यस्यादर्शलक्ष्यं निरूपयति; प्लेटो च विवाददृशा तथ्यविवेचनं दोषनिरूपणं च करोति। प्लेटोकृतकाव्यसम्बन्धि दिक्सूत्रं दर्शनशास्त्रस्य काव्यानां पारस्परिकविरोधस्य चान्तर्निहितमास्ते। इदमेव काव्यनिषेधस्य मूलमप्यस्ति। काव्यदर्शनशास्त्रयोरयं प्रतीयमानो विरोधो न स्वाभाविकः। काव्यदर्शनयोरयं विरोधोऽविकसितावस्थायामेव संभवति। किन्तु विकस्वरोच्चधरातलारूढौ महाकविदार्शनिकौ जात्वपि विरोधिनौ न भवतः। स्वयं प्लेटोकाव्ये तत्कवित्वशक्तिस्तद्विवेचनप्रणाल्यां स्फुरतितराम्। ईशात्परं तृतीयशताब्द्यां प्लेटोसिद्धान्ता रोम-वास्तव्यस्य प्रथितविचारकस्य प्लोटिनसस्य चिन्तनधारां प्रभावितां चक्रुः। ततश्च ते प्लोटिनसस्यैव विमर्शनदिशाऽवालोक्यन्त। अनयैव दिशा सप्तदशशताब्द्यां लब्धप्रतिष्ठविचारकाणां तादृशैकसमुदायेन प्रेरणा प्राप्ता, ये 'कॅम्ब्रिज प्लेटो निष्ठाः' समबोध्यन्त। एषां विचकट, हैनरी, मूर-कडवर्थ, जानस्मिथ प्रभृतयो विशेषत उल्लेख्या सन्ति। ततः परम् ए० एन्० ह्वाइटहैड विचारकेण स्वरचनासु तथाविधस्य विज्ञानदर्शनस्यान्वेषणे प्रयासोऽकारि यस्य मूलं तन्मते प्लेटो रचनास्वन्तर्भूतमासीत्।

काव्यशास्त्रधरातले मेधाविनोऽस्याचार्यस्य दानं प्रायशो दर्शनस्य राजनीतेश्च घटाटोपे घने धूमान्धतां प्राप्तमास्ते, वयमागामिष्वङ्केषु तस्यैवाभिज्ञानायान्वेषणाय च प्रयतिष्यामहे।

———

ध्वनितत्त्वम्

श्री डा० रामनारायणदास सीनियर रेसिर्चफैलो, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी

अर्थावबोधकमनर्थकञ्च सर्वमपि शब्दजातं ध्वनीत्यपरनाम्ना प्रोच्यते । उक्तञ्च पातञ्जल-महाभाष्यस्य पस्पशाह्निके—

'अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः,'

अनेन सार्थकस्य शब्दस्य ध्वनिरूपत्वं प्रमाणतामायाति । निरर्थकोऽपि शब्दो ध्वनिरिति तु लोके प्रसिद्धमेव। किञ्च नूतनध्वनिविज्ञानलोके सर्व विधोऽपि शब्दः ध्वनिरुच्यते। संवित्स्वरूपा मन्त्र-वीर्यात्मा परा वाग्, अथ च पश्यन्ती, मध्यमेति वाग्द्वयमपि ध्वनिपदेन व्यपदिश्यते। तद्यथा—

एवं त्रिविधविसर्गविशसमापत्तिधाम्नि य उदेति ।
संवित्परिमर्शात्माध्वनिस्तदेव मन्त्रवीर्यं स्यात् ।।

तन्त्रालोकः २४।१७२

अत्र संवित् परिमर्शात्मेतिपदेन परावाग्गृह्यते। पश्यन्त्याश्च परावाङ्मूलत्वात् साऽपि ध्वनिस्वरूपा। मध्यमायाः वाचो ध्वनिशब्देन व्यवहारो योग-चूडामण्युपनिषदि प्रोक्तः । तद् यथा—

तैलधारामिवाच्छिन्नं दीर्घघण्टा निनादवत् ।
प्रणवस्य ध्वनिस्तद्वत् तदग्रं ब्रह्म चोच्यते ।।८०।।

एवं सर्वविधस्याऽपि शब्दस्य शास्त्रकारैर्ध्वनी-त्यपरनाम्ना व्यवहारात् सर्वोऽपि शब्दो ध्वनिना-मार्हः । समेषां शब्दानां मूलं स्वरूपं **'अहम्'** इति वदन्ति सुधियः। इदञ्च तथ्यं भगवान् पाणिनिरपि स्वीकरोति । भगवान् पाणिनिः चतुर्दशसूत्रात्मके वर्णसमाम्नायस्यादौ अकारम् अन्ते च हकारं पठित-वान् । अकारहकारयोर्मध्ये सर्वान् वर्णांश्च पठित-वान् तेन सर्वे वर्णास्तन्मध्यगतत्वाद् **'अहं'** इत्यनेनैव प्रत्याहृताः । अहमित्यत्र **'म'** इति तु प्रथमविभक्ते-रेकवचनस्य रूपम् । किञ्च पाणिनीयव्याकरणे वर्णसमाम्नाय घटकानि सर्वाणि व्यञ्जनानि अस्व-रेणैव पठितानि । तेन अकारएव समेषां वर्णानाम् अथ च अर्थानां मूलमिति औपनिषदं तथ्यं भगवता पाणिनिना स्वीक्रियते इति संसूच्यते । यद्यपि शब्दसाधनप्रक्रियादृष्ट्या शलादिप्रत्याहारेषु ग्रह-णार्थम् अन्त्यहकारस्य प्रयोजनमुक्तम्, तेन अलिक्षत इत्यादौ **'शल इगुपधादनिटः क्सः'** इति सूत्रेण च्लेः क्सादेशः सञ्जायते, तथापि दार्शनिकदृष्ट्या विचार्यमाणे सति तद्भिन्नमपि प्रयोजनं दृष्टिपथं समायाति । तच्च प्रयोजनं **'अहम्'** इत्येव सर्ववा-क्तत्त्वमित्यस्यावबोधनम् । अहमित्येव ध्वनितत्व-मिति तथ्यं न केवलं भगवान् पाणिनिरेव, अपितु अन्येऽपि दार्शनिकाः स्वीकुर्वन्ति । तद्यथा—

निराभासात् पूर्णाद् अहमिति पुरा भासयति यद् ।
द्विशाखामास्ते तदनु च विभक्तुं निजकलाम् ।।
स्वरूपाद् उन्मेषप्रसरणनिमेषस्थितिजुषम् ।
तदद्वैतं वन्दे परमशिवशक्त्यात्मनिखिलम् ।।१।।

यस्मात् सर्वे आभासाः (अखिलब्रह्माण्डविषयक-ज्ञानानि) निष्क्रान्ताः विनिर्गताः यद्वा निःसृताः, सर्वेषाम् आभासानां मूलोपादानत्वात् । यच्च पूर्णम् तस्मादेव 'अहमित्यस्य स्फुरणं जातम् । 'अह' इत्य-नयोर्मध्ये अकारः शिवः हकारश्च शक्तिस्वरूपः । अहमिति तत्त्वम् उन्मेषप्रसरणनिमेषेतिस्थिति-त्रयविशिष्टम् । उन्मेषः जगदुद्भवः प्रसरणं विस्तारः, पालनादिक्रिया च, निमेषः संहारः । जगदुद्भवपालन१संहारशक्तयः अहंतत्वस्याङ्ग-भूताः ।

लोकेऽपि सर्वप्राणिषु मूलाधारात् सततं ध्वनिः स्फुरन् हृदयादिस्थानमतिक्राम्यन् लोकोपयोगि वाग्रूपतां धत्ते । स एव मूलध्वनिः हृदयादि-

---

१ अभिनवगुप्तकृत ईश्वरप्रत्यभिज्ञाविमर्शिनी ।

स्थानसंयोगेन मध्यमादिनाम्ना व्यपदिश्यते । पराभावात् पश्यन्तीपदं ततोऽपि मध्यमापदं तस्माच्च वैखरीविषयतामापादयति । गर्भीकृताशेषवाच्यवाचकं प्रत्याहारात्मकम् अहंतत्त्वमेव परावाङ्नाम्नाऽभिधीयते तथा चोक्तम्—

याऽहमित्युदिता वाक् परा च सा[1] ।

तस्मिन् ब्रह्मणि **'अहम् एकः'** इत्यस्याभासः सृष्टेरादौ सर्वप्रथमं बभूव, ततः **'बहु स्याम्'** इति द्वितीय आभासः सञ्जातः ।

'एकोऽहं बहुस्याम्' इति सिसृक्षया निष्कले ब्रह्मणि यद् **'अहम्'** इति ध्वनिरूपस्य स्फुरणं जातम्, सा एव परमात्मनः पराशक्तिः । सा च पराशक्तिः ध्वनिपदेनापि व्यवह्रियते । तथा चोक्तम्—

अदृष्टविग्रहाच्छान्ताच्छिवात् परमकारणात् ।
ध्वनिरूपं विनिष्क्रान्तं शास्त्रं परमदुर्लभम् ॥

परब्रह्मणि **'अहम्'** इत्याकारकं यत्स्पन्दनं तदेव ध्वनितत्त्वम् । अस्मादेव पश्यन्त्यादिवाग्रूपा ध्वनयो विस्तारतां यान्ति । तनोति विस्तारयति स्वात्मानं विविधवाच्यवाचकभेदेन यः स तत् । विस्तारार्थक तनुधातोः कर्तरि क्विप् प्रत्यये सति तस्य च सर्वापहारिलोपे धातुघटकनकारस्य च लोपे 'त' इति स्थितौ तुगागमे सति अनुबन्धलोपे 'तत्' इति रूपं निष्पद्यते । ततो भावः कर्मवेति विग्रहे त्व प्रत्यये प्रथमविभक्त्येकवचने **'तत्त्वम्'** इति पदस्य निष्पत्तिः । ध्वनीनां तत्त्वमिति ध्वनितत्त्वम् तच्च तत्त्वम् अहमित्येव । यद्वा यस्माद् येन वा सर्वमिदं वाच्यं वाचकञ्च ततम्, तत्तत्त्वपदेन व्यवह्रियते । तथा चोक्तं श्रीमतङ्गे—

तत्त्वं वस्तुपदं व्यक्तं स्फुटमाम्नायदर्शनात् ।
ततमेतेन वा यस्मात् तत्त्वं तत्त्वसन्ततौ ॥

येन यस्माद्वा नाम तदभिधेयञ्च तते तत् तत्त्वमुच्यते । तच्च तत्त्वम् अहमित्येव ।

शिवाद्यवनिपर्यन्तो यो यमध्वातिविस्तृतः ।
स समस्तश्चितो ज्ञेयो नाशिवत्वादविमुच्यते ॥

शिवात् प्रारभ्य अवनिपर्यन्तं योऽयं वर्णपदमन्त्रकलाभुवनतत्त्वात्मकोऽध्वा विस्तृतः स चित एव विस्तृतः । तज्ज्ञानादेव क्लेशनिवृत्तिः । अत्र चित्पदेन प्रकाशविमर्शात्मनः 'अहम्' इति ब्रह्मनिष्ठस्पन्दनस्यैव ग्रहणम्, पर्यायवाचित्वात् । तदुक्तं विरूपाक्षपञ्चशिकायाः प्रथमस्कन्धे—

ईश्वरता कर्तृत्वं स्वतन्त्रता चित्स्वरूपता चेति ।
एतेऽहन्तायाः किल पर्यायाः सद्भिरुच्यन्ते ॥

सर्वेषां ध्वनीनाम् अर्थानाञ्च ब्रह्मनिष्ठस्पन्दनमयमहन्तारूपं यत् प्रतिज्ञातम्, तदेव ईश्वरत्वम्, कर्तृत्वम्, चिन्मयत्वञ्च । ईश्वरतादिपदेन व्यवह्रियमाणं तदेव तत्त्वं विन्दुकुण्डलिनीत्यनयोरपि पर्यायभूतम् । तदुक्तम्—

विन्दुश्चैवेश्वरः स्वयम् ॥२६४॥ स्वच्छ० तन्त्र पट० ॥४॥

गुदलिङ्गान्तरे चक्रमाधाराख्यं चतुर्दलम् ।
अस्ति कुण्डलिनीब्रह्मशक्तिराधार पङ्कजे ॥

संगीत रत्ना० १।२।११९-१२० ।

निष्कलब्रह्मनिष्पन्दभूताहमिति महासत्तारूपस्य चिदादीनाञ्च परस्परं पर्यायवाचित्वम्, पर्यायवाचित्वाच्च एकमेव तत्त्वं चिदादिपदेन व्यवह्रियते ।

ध्वनितत्त्वरूपा येयमहन्ता प्रोक्ता सा स्पन्दसंज्ञकाप्यभिधीयते । किञ्चिच्चलनार्थकात् स्पदिधातोः स्पन्दशब्दो व्युत्पद्यते । स्पन्दनात् स्पन्दः । स्पन्दनञ्च निस्तरङ्गस्यास्य परमात्मनः युगपन्निर्विकल्पा या सर्वत्रौन्मुख्यवृत्तिता । उक्तञ्च—

षाड्गुण्यरूपस्य यत्स्फुरन् प्रतिमोदयः ।
स चात्मबलशक्तीशश्चिद्रूपः स्पन्दसंज्ञकः ॥

---

[1] चिद्गगनचन्द्रिका ।

निष्कलब्रह्मनिष्पन्दभूतेयमहन्ता सांख्यादि-शास्त्रेषु प्रतिपादितो बुद्धि तत्त्वात् समुत्पन्नो योऽहङ्कारस्तद्रूपो न। न वा अस्मच्छब्देन प्रथमविभक्तौ योऽहं शब्दस्तद्रूपः। न वा पुनरहमिति प्रतीयमानतयेव या अहन्ता तद्रूपा, किन्तु प्रकाशविमर्शात्मिका एव अहन्ता अत्र अहं पदेन गृह्यते। विषयग्रहे 'अहं चक्षुषा रूपं पश्यामि' इत्येवं रूपादिग्रहणस्थलेऽहमिति ज्ञातृरूपेण प्रतीयमाना या अहन्ता सा प्रकाशविमर्शात्मिकाया अहन्ताया अंशभूता। अहमिति पदघटकौ अकारहकारौ क्रमशः प्रकाशविमर्शौ व्यवह्रियते। प्रकाशविमर्शयोः सर्वत्रव्यापकत्वात् अहमिति महासत्ता सामान्यभूता। सामान्याच्च 'सामान्ये नपुंसकम्' इति नियमान्नपुंसकोऽयं शब्दः। अविभक्तिकं न प्रयुञ्जीत इत्युक्तदिशा अहशब्दात् सौ विभक्तौ नपुंसकलिङ्गपरत्वाच्च तस्य अमादेशे पूर्वरूपे सति 'अहम्' इति निष्पद्यते। अहमिति च ध्वनिः प्रकाशविमर्शस्वरूपः। उक्तञ्च—

अहमित्येकमद्वैतं यत् प्रकाशात्मविभ्रमः।
अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः॥
हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तितः॥

शिवशक्त्यात्मनो प्रकाशविमर्शयोः समरसीभूते सति अहमिति परमद्वैतं स्फुटीभवति। अत्र प्रकाशो धर्मी विमर्शश्च तद्धर्मः। यद्वा अहमिति ध्वनौ प्रकाशात्मको यो कारः स शिवः विमर्शात्मको यश्च हकारः स शक्तिः। उक्तञ्च काशीखण्डे—

यदेकलो न शक्नोसि रन्तुं स्वैरञ्चरप्रभो।
त्वमेको द्वित्वमापन्नः शिवशक्तिप्रभेदतः॥

प्रकाशस्य धर्मभूतो यो विमर्शात्मको हकारः तस्मात् पदमन्त्रवर्णानाम्, अथ च धर्मभूतविमर्शस्य धर्मिभूतो यः प्रकाशः तस्मात् तत्त्वभुवनकलानाम् अभिव्यक्तिरिति परावाङ्नाम्ना व्यपदिश्यमानात् चितिस्वरूपाद् 'अहम्' इत्यस्मादेव ध्वनेः शब्दार्थोभयोरपि सृष्टिर्जाता। उक्तञ्च भर्तृहरिणा वाक्यपदीयस्य ब्रह्मकाण्डे—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥

एवं चितिस्वरूपा इयम् अहन्ता शिवशक्त्योः समरसीभूता निखिलं ब्रह्माण्डं प्रकाशयन्ती सर्वत्र व्याप्ता। यतो हि जडपदार्थेष्वपि परिणामादि क्रिया दृश्यन्ते। यथा घटपटादीनां नित्यं परिणामो दृश्यते, परिणामनरूपेयं क्रिया चेतनसंयोगं विना असम्भवा, सर्वस्याः क्रियायाः चित्संयोगादेव निष्पादनात्। नाहं देहः, किन्तु चित्स्वरूपोऽहम् इत्येवं देहाद्यधिरूढायास्तमोऽहन्तायाः त्यागे सति हृत्सरोजे विमला अहंरूपा चितिः कला समुदेति। विज्ञाता सती च सा अहंरूपा चितिर्मोक्षं ददाति।

चित्स्वरूपात्मिका परावाग्रूपा अहन्ता एव पूर्णाहन्ता। पूर्णाहन्ताया हृत्सरोजे यावन्नोदयः अहं कुलपतिः अहं सम्राट् इत्येवं तमोरूपा हन्ता हृदि च यावत् स्फुरति, न तावन्मन्त्रवीर्यलाभः। मन्त्रवीर्यलाभाभावाच्च न मन्त्रसिद्धिः। प्रत्यवमर्शात्मको योऽयमहन्तारूपो महाह्रदः, तत्र निमज्जनात् यद्वा तस्यानुसन्धानाद् मन्त्रवीर्यलाभः। उक्तञ्च शिवसूत्रे—

महाह्रदानुसन्धानाद् मन्त्रवीर्यानुभवः।
—मातृकाचक्रसम्बोधः।

—क्रमशः

सम्पादकीय टिप्पण्यः

बिहारे जनबुद्धत्वम्

बिहारप्रदेशे जयप्रकाशनारायणमहाभागस्य नेतृत्वे यदहिंसकमान्दोलनं प्रचलदास्ते यज्जनबुद्धत्वं जातं तेनानुमीयते यद् बोधिसत्वस्य कर्मक्षेत्रं बिहारप्रदेशः प्रसववेदनामनुभवति काञ्चिदलौकिकतां प्रकटयितुम्। यद्यनेन जनान्दोलनेनासुरवृत्तिजन्या लोभमोहोत्कोचभ्रष्टाचारादिदोषा प्रशाम्येरन् सत्ववृत्तिप्रख्याः सत्यदयादानोपकारादिगुणाः सर्वेषां मनसि समुत्पद्येरन् तदा भारतीयमनोराज्यं स्वच्छं शुद्धमनाविलं भवितुमारब्धमिति मन्तव्यम्। यादृशं विशालं सर्वकारविरुद्धं जनमानसमधुना विहारप्रदेशे गुर्जरप्रदेशे वा दृष्टिपथं यातं तादृशं ब्रिटिशसर्वकारस्य विरुद्धं नासीत्। अतः सर्वैः प्रशासकवर्गैरन्यदलसम्बद्धैश्च नेतृवर्गैर्मिथः प्रेम्णा सम्मिल्य सम्यक् विचारणीयं यत् कथं सुशासनं भवितुमर्हति। एतत्तु सुनिश्चितं यच्छासकशास्ययोर्मध्ये कथञ्चिदवर्णनीयं युद्धं प्रवृत्तमस्ति। यस्याः कारणात् उभयोः संघर्षः प्रवृत्तस्तामासुरवृत्ति हन्तुमसमर्थः प्रतीयतेऽयं शासकवर्गः। अस्मन्मते तु सर्वेषां दलानां मिथः सम्मिलनमेव चरमं साधुसमाधानं विद्यते।

अभिनन्दनम्

महान् प्रमोदावहोऽयमुदन्तो यत् गुरुकुलकांगड़ीविश्वविद्यालयस्य नवीनः कुलपतिः श्री डा. सत्यकेतु विद्यालंकारमहाभागो निर्वाचितः। अधुना कुलपतिरयं साधुकार्यभारं वहति। आशास्महे यत् गुरुकुलस्य सर्वविधोन्नतिर्विशेषतो विद्याक्षेत्रेषु नूनं सम्पत्स्यते। अभिनन्दनीयोऽयमस्माभिर्नवकुलपतिः श्री डा० सत्यकेतुविद्यालङ्कारमहाभागः। अभिनन्दनीयश्च श्री डा. रामनाथ वेदालंकार महाभागो यदसौ गुरुकुलस्याचार्यपदमधिष्ठितः। मन्ये अस्य महाभागस्याचार्यत्वे विद्यार्थिवर्गेषु चरित्रनिर्माणं विशेषतो विद्यालयविभागस्य छात्रेषु साधु संस्कारा जनि लप्स्यन्ते।

आकाशवाणीदिल्लीतः संस्कृते वार्ताप्रसारः

ईस्वीय १९७४ तमस्य जूनमासस्य त्रिंशत्तमदिनाङ्कादारभ्याकाशवाणीदिल्लीतः प्रतिदिनं प्रातः नववादनसमये संस्कृते वार्ताप्रसारः प्रत्यहं सम्पत्स्यत इति शुभाभिनन्दनीयोऽयं निर्णयः। शुभारम्भोऽयं संस्कृतसंस्कृतिसमुन्नत्यै। अद्यतनीया प्रथमा वार्ताऽस्माभिः श्रुता। सरलायां भाषायां सा वार्ताऽऽसीत्। ये संस्कृतानभिज्ञा विद्यन्ते मन्ये तेऽपि स्वल्पप्रयत्नेनावबोद्धुं पारयन्ति। अस्मन्मते तु संघलोकसेवाऽऽयोगस्य परीक्षायां संस्कृतज्ञानमवश्यं निवेशनीयं प्राथम्यं वा तत्र प्रदातव्यम्। अस्तु अभिनन्दनीयः साधुवादार्हश्च सर्वकारः।

राष्ट्रभाषाभक्तः स्वर्यातः

महान् दुःखप्रदोऽयं समाचारो यत् राष्ट्रभाषाभक्तः, राष्ट्रभाषाविधेयकसमये संसदि स एवैकाकी योद्धा वैष्णवभक्तो धर्मपरायणः श्री सेठ गोविन्ददासः मातरं भारतभूमिं विहाय दिवं यातः। राष्ट्रभाषायाः राजर्षिटण्डनसमकक्षोऽयं प्रबलपोषकः प्रशान्तचित्तउदारमना सरलस्वभाव आसीत्। साहित्य राजनीति धर्मादिक्षेत्रसम्बद्धानां जनानां प्रियमधुरभाषी नेताऽऽसीत्। वयं दिवंगतात्मने सद्गतिं परिवारवर्गाय शान्तिं च प्रार्थयामहे।

कन्यागुरुकुलदेहरादूनस्य पूर्वाचार्याया निधनम्

कन्यागुरुकुलदेहरादूनस्य पूर्वाचार्या श्रीमती विद्यावती सेठ दिवं यातेति श्रुत्वा महद् दुःखं जातम्। सा कन्यागुरुकुलदेहरादूनस्य सर्वतः पूर्वमाचार्यपदमधिष्ठितवती। तस्या आचार्यत्वे छात्रासु नियन्त्रणं नियमपालनं सुदृढमासीत्। अस्मन्मते तु छात्रवर्गेषु ब्रह्मचर्यनियमपालनतपस्यागुरुभक्त्यादिसद्गुणावर्जनाय प्रवणता समुद्बोध्या। वयं परमपितरं प्रभुं प्रार्थयामो यदसौ दिवंगतायै सद्गतिं पारिवारिकजनेभ्यः शान्तिं सौमनस्यं च प्रददात्विति।

साहित्य समीक्षा

ऋग्वेदभाष्यम्

द्वितीयो भागः (१म मण्डलं--सूक्तम् २०-५० पर्यन्तम्) (आर्यसमाजशताब्दीसंस्करणम्)।

रचयिता--स्वामी दयानन्द सरस्वती।

प्रकाशकः--चौधरी प्रतापसिंहः, करनाल, हरयाणा।

प्राप्तिस्थानम्--रामलाल कपूर ट्रस्ट, बहालगढ़, सोनीपत (हरयाणा), मूल्यम् २५.००।

करनालवासिनः श्री चौधरी प्रतापसिंहमहाभागस्य पुण्येनार्थसाहाय्येन स्वामिदयानन्दविरचितस्य ऋग्वेदभाष्यस्य द्वितीयो भागः रामलालकपूरट्रस्ट द्वारा प्राकाश्यं नीतः। यथाऽस्य प्रथमो भागः महताध्यवसायेन संशोध्य प्रकाशितस्तथैवायमपि संशोधितः। परमत्रैकं वैशिष्ट्यमपि विद्यते तत् सम्पादकप्रवरैर्विद्वद्वर्यैः श्री युधिष्ठिरमीमांसकमहोदयैर्लिखिता वैदुष्यपूर्णा भूमिका वेदानां महत्त्वं तत् प्रचारोपायाश्च विद्यते। सैषा भूमिका संस्कृतभाषायां लिखिता तस्या हिन्दीरूपान्तरमपि सहैव प्रकाशितम्। अत्र षट्परिशिष्टानि भाष्यस्य श्रीवृद्धिकराणि जातानि। पाठकानां सौलभ्याय संजातानि। तदेतन्महत् पुण्यकार्यम्। अस्माकं तु मनःकामना विद्यते यदित्थमेव समग्रयो ऋग्यजुर्भाष्ययोः सम्पादनं मीमांसकमहोदयानामाध्यक्ष्ये निरीक्षकत्वे च सम्पद्येत तदार्यसाहित्यस्य महानुपकारो जायेत। वयं मीमांसकमहोदयानां चिरायुष्यमारोग्यं च कामयामहे। एवमेव श्री चौधरी प्रतापसिंहस्य श्रीवृद्धिर्द्विगुणतरा भवेत् येषामर्थसाहाय्येन समग्रमेतत् कार्यं पूर्णतां यायात्।

विश्वज्योति

(धर्मशास्त्र अंक भाग=१-२)

प्रधान सम्पादकः--श्री सन्तराम बी.ए.।

प्रकाशकः--श्री विश्वेश्वरानन्द संस्थान, साधु आश्रम, होशियारपुर।

स्व० श्री डा० विश्वबन्धुमहाभागस्य संरक्षकत्वे नियन्त्रणे मार्गप्रदर्शने च विश्वेश्वरानन्दसंस्थानेन भारतीयसंस्कृतिसाहित्यक्षेत्रे या महती समुन्नतिर्विहिता सा सर्वजनविदिताऽस्ते। संस्थानद्वारा ईस्वीय १९५२तमादारभ्य हिन्दीभाषामाध्यमेन 'विश्वज्योति' पत्रिका धर्मसंस्कृतिसाहित्यादिक्षेत्रेषु जनताजनार्दनस्य सेवां विदधती भृशं प्रेरयति पाठकानां मनांसि सन्मार्गगमनाय ज्ञानसंवर्धनाय च। सारवल्लघुलेखानां प्रकाशनमस्याः स्वकीयं वैशिष्ट्यम्। प्रतिवर्षं विशेषांकदाने सदोद्यता तिष्ठति। अस्मिन्वर्षे धर्मशास्त्रविषयमङ्गीकृत्य भागद्वये प्रकाशितोऽयं विशेषांकः। जनतायाः सामाजिकवैयक्तिकचरित्रनिर्माणाय धर्मशास्त्रस्य प्रथमं स्थानमिति बोध्यम्। धर्मशास्त्रपरिधौ वेदपुराणादिसमग्रं साहित्यं समापतति तथापि स्मृतीनां धर्मसूत्राणामेव तत्र प्रामुख्यमिति मन्तव्यम्। पूर्ववदयं विशेषांकोऽपि (१)लेखादिखण्डः (२)पुण्यपृष्ठखण्ड इति खण्डद्वये विभक्तः। मनुस्मृत्यादि स्मृतीरुद्दिश्य चत्वारिंशत्संख्यका लेखाः सन्ति। प्रायः षट्शत संख्यकाश्च श्लोकाः स्मृतिभ्यः संगृह्य पुण्यखण्डे प्रदर्शिताः सन्ति। एवं भागद्वयात्मकोऽयं विशेषांकः सर्वैर्धर्मप्रेमिभिः संग्रहणीयोऽस्ति।

ओ३म्

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

प्रवेश सूचना

निम्न विभागों में १ जुलाई, १९७४ से नया प्रवेश प्रारंभ है :—

(१) पी-एच०डी० (शोध कार्य)

वेद, संस्कृत, हिन्दी और प्राचीन भारतीय इतिहास, संस्कृति तथा पुरातत्व में पी-एच०डी० की व्यवस्था है। रजिस्ट्रेशन फीस ५० रु० है। प्रवेश फार्म तथा नियमावली का शुल्क ५ रु० है। केवल नियमावली का शुल्क डाक व्यय सहित १ रु० २५ पैसे है। कुछ शोधार्थियों के लिए ३०० रु० मासिक शोध छात्रवृत्ति प्राप्य है।

(२) एम० ए०

१– वैदिक साहित्य
२– संस्कृत साहित्य
३– दर्शनशास्त्र
४– हिन्दी
५– अंग्रेजी
६– मनोविज्ञान (एम० एस-सी०, भी)
७– प्राचीन भारतीय इतिहास, संस्कृति तथा पुरातत्व
८– गणित (एम०एस-सी० भी)

एम० ए० प्रवेशार्थ योग्यता :

१– अलंकार (गुरुकुल कांगड़ी)
२– बी०ए०, बी०एस-सी०, बी० काम०
३– आचार्य
४– विद्याभास्कर
५– शास्त्री (वाराणसी–अंग्रेजी रहित तथा अंग्रेजी सहित दोनों)–केवल वेद, संस्कृत तथा हिन्दी में प्रवेश के लिये।

छात्र-वृत्ति तथा शुल्क-मुक्ति :

एम० ए० कक्षाओं में योग्य तथा अधिकारी छात्रों को शुल्क मुक्ति भी मिल सकती है। एम०ए० वेद विषय में सभी छात्रों को छात्रवृत्ति एवं शुल्क मुक्ति दी जाती है।

प्रवेश की अन्तिम तिथि :

प्रवेश ७ अगस्त तक होगा। इसके पश्चात् ३१ अगस्त तक २० रुपये विलम्ब शुल्क सहित कुलपति जी की विशेष आज्ञा से प्रवेश हो सकेगा।

(३) अलंकार (बी० ए०)

प्रवेशार्थ योग्यता :

१– विद्या विनोद (गुरुकुल कांगड़ी)
२– इंटरमीडिएट संस्कृत सहित
३– उत्तर मध्यमा अंग्रेजी सहित (बनारस)
४– विशारद (पंजाब यूनिवर्सिटी) अंग्रेजी में इन्टरमीडिएट सहित ।

(४) विद्या विनोद (इन्टरमीडिएट)

प्रवेशार्थ योग्यता :

१– विद्याधिकारी (गुरुकुल)
२– हाई स्कूल संस्कृत सहित
३– पूर्व मध्यमा अंग्रेजी सहित (वाराणसी)
